Shri Raghunatha Temple MSS. Library,
JAMMU

No. ११५८ - घ

Title नादबिन्दू पनिषत्

Author

Extent २ Age

Subject उपनिषत् - सम्पूर्णम्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० ११५८-घ

क नादबिन्दूपनिषत्

ख ब्रह्मबिन्दूपनिषत् पत्रे २

ग अमृतबिन्दूपनिषत्

पत्रे २ (सम्पूर्ण)

नं० ११५७-घ

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं. २२५६

श्रीगणेशायनमः ॐ अकारोदक्षिणःपक्षउकारस्तूत्तरःस्मृतः मकारस्तस्यपुच्छंवा
अर्धमात्राशिरस्तथा पादौरजस्तमस्तस्यशरीरंसत्वमुच्यते धर्मश्चदक्षिणंचक्षुरधर्मः
श्चोत्तरंस्मृतं भूर्लोकःपादयोस्तस्यभुवर्लोकस्तुजानुनोः स्वर्लोकःकटिदेशेतुनाभिदे
शेमहर्जगत् जनलोकस्तुहृदयेकंठदेशेतपस्ततः भ्रुवोर्ललाटमध्येतुसत्यलोकोव्यव
स्थितः सहस्रार्णमितिचात्रमंत्रएवप्रदर्शितः एवमेनंसमारूढोहंसयोगविचक्षणः नब
ध्यतेकर्मचारीपापकोटिशतैरपि आग्नेयीप्रथमामात्रावायव्येषावशानुगा भानुमंडलसं
काशाभवेन्मात्रातथोत्तरा परमाचार्धमात्राचवारुणींतांविदुर्बुधः कलात्रयाननावापितासां
मात्राप्रतिष्ठिता एषओंकारआख्यातोधारणाभिर्निबोधत घोषिणीप्रथमामात्राविद्युन्माला
तथापरा पतंगीचतृतीयास्याच्चतुर्थीवायुवेगिनी पंचमीनामधेयाचषष्ठीचैंद्रीविधीयते।
सप्तमीवैष्णवीनामशांकरीचतथाष्टमी नवमीमहतीनामध्रुवेतिदशमीमता एकादशी
भवेन्मौनीब्राह्मीतिद्वादशीमता प्रथमायांतुमात्रायांयदिप्राणैर्वियुज्यते सराजाभारतेव
र्षेसार्वभौमःप्रजायते द्वितीयायांसमुत्क्रांतोभवेद्यक्षोमहात्मवान् विद्याधरस्तृतीयायां
गंधर्वस्तुचतुर्थिकां पंचम्यामथमात्रायांयदिप्राणैर्वियुज्यते उषितःसहदेवत्वंसोमलो
केमहीयते षष्ठ्यामिंद्रस्यसायुज्यंसप्तम्यांवैष्णवंपदं अष्टम्यांव्रजतेरुद्रंपशूनांचपतिंत
था नवम्यांचमहर्लोकंदशम्यांचध्रुवंव्रजेत् एकादश्यांतपोलोकंद्वादश्यांब्रह्मशाश्वतं त
तःपरतरंशुद्धंव्यापकंनिष्कलंशिवं सदोदितंपरंब्रह्मज्योतिषामुदयोयतः अतींद्रियंगुणा
तीतंमनोनीलंयथाभवेत् अनौपम्यमभावंचयोगयुक्तंतदादिशेत् तद्युक्तःसन्मनासन्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

बिं.उ.

१ ॐ मनोहिद्विविधंप्रोक्तंशुद्धंचाशुद्धमेवच अशुद्धंकामसंकल्पंशुद्धंकामविवर्जितं मनएवम
नुष्याणांकारणंबंधमोक्षयोः बंधायविषयासक्तंमुक्तंनिर्विषयंस्मृतं अतोनिर्विषयस्या।
स्यमनसोमुक्तिरिष्यते तस्मान्निर्विषयंनित्यंमनःकार्यंमुमुक्षुणा निरस्तविषयासंगंसन्नि
रुद्धंमनोहृदि यदायात्युन्मनाभावंतदातत्परमंपदं तावदेवनिरोद्धव्यंयावद्धृदिगतंक्षयं ए
तज्ज्ञानंचध्यानंचअतोन्योग्रंथविस्तरः नैवचिंत्यंनचाचिंत्यंअचिंत्यंचिंत्यमेवच पक्षपा
तविनिर्मुक्तंब्रह्मसंपद्यतेतदा स्वरेणसंधयेद्योगमस्वरंभावयेत्परं अस्वरेणहिभावेन।
भावोनाभावइष्यते तदेवनिष्कलंब्रह्मनिर्विकल्पंनिरंजनं तद्ब्रह्माहमितिज्ञात्वाब्रह्मसंप
द्यतेध्रुवं निर्विकल्पमनंतंचहेतुदृष्टांतवर्जितं अप्रमेयमनाद्यंचज्ञात्वाचपरमंशिवं न
निरोधोनचोत्पत्तिर्नबंधोनचशासनं नमुमुक्षानमुक्तिश्चेदित्येषापरमार्थता एकए
वात्मामंतव्योजाग्रत्स्वप्नसुषुप्तिषु स्थानत्रयाद्व्यतीतस्यपुनर्जन्मनविद्यते एकएवहि
भूतात्माभूतेभूतेव्यवस्थितः एकधाबहुधाचैवदृश्यतेजलचंद्रवत् घटसंभृतमाका
शंलीयमानघटेयथा घटोलीयेतनाकाशंतद्वज्जीवोघटोपमः घटवद्विविधाकारं
भिद्यमानंपुनःपुनः तद्भग्नंनचजानातिसजानातिचनित्यशः शब्दमायावृतोऽयावत्
तावत्तिष्ठतिपुष्करे भिन्नेतमसिचैकत्वमेकमेवानुपश्यति शब्दाक्षरंपरंब्रह्मयस्मिन्
क्षीणेयदक्षरं तद्विद्वानक्षरंध्यायेद्यदीच्छेच्छांतिमात्मनः द्वेविद्येवेदितव्येतिशब्दब्र
ह्मपरंचयत् शब्दब्रह्मणिनिष्णातःपरंब्रह्माधिगच्छति ग्रंथमभ्यस्यमेधावीज्ञानवि
ज्ञानतत्वतः पलालमिवधान्यार्थीत्यजेद्ग्रंथमशेषतः गवामनेकवर्णानांक्षीरस्याप्येकवर्णता
... सर्वानुग्राहकत्वेनतदस्म्यहंवासुदेव तदस्म्यहंवासुदेवमिति इतिब्रह्मबिंदूपनिषत् १

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

[illegible]

ॐ शास्त्राण्यधीत्य मेधावी अभ्यस्य च पुनः पुनः परमं ब्रह्मविज्ञाय उल्कावत्तान्यथोत्सृजे
त् ॐकारं रथमारुह्य विष्णुं कृत्वा तु सारथिं ब्रह्मलोकपदान्वेषी रुद्राराधनतत्परः तावद्र
थेन गंतव्यं यावद्रथपथि स्थितः स्थित्वा रथपथस्थानं रथमुत्सृज्य गच्छति मात्रालिंगपदं
त्यक्त्वा शब्दव्यंजनवर्जितं अस्वरेण मकारेण पदं सूक्ष्मं च गच्छति शब्दादिविषयाः पंचम
नश्चैवातिचंचलं चिंतयेदात्मनो रश्मीन् प्रत्याहारः स उच्यते प्रत्याहारस्तथा ध्यानं प्राणा
यामोऽथ धारणा तर्कश्चैव समाधिश्च षडंगो योग उच्यते यथा पर्वतधातूनां दह्यंते धमना
न्मलाः तथेंद्रियकृता दोषा दह्यंते प्राणनिग्रहात् प्राणायामैर्दहेद्दोषान्धारणाभिश्च कि
ल्बिषं किल्बिषं हि क्षयं नित्वा रुचिरं चैव चिंतयेत् रुचिरे रेचकं चैव वायोराकर्षणं तथा।
प्राणायामास्त्रयः प्रोक्ता रेचकपूरककुंभकाः सव्याहृतीं सप्रणवां गायत्रीं शिरसा सह त्रिः
पठेदायतः प्राणः प्राणायामः स उच्यते उत्क्षिप्य वायुमाकाशं शून्यं कृत्वा निरात्मकं शून्य
भावेन युंजीयाद्रेचकस्येति लक्षणं नोच्छ्वसेन्नानुच्छ्वसेन्नैव गात्राणि चालयेत् एवं वायु
र्गृहीतव्यः पूरकस्येति लक्षणं वक्त्रेणोत्पलनालेन वायुं कृत्वा निरात्मकं एवं वायुर्गृहीत
व्यः कुंभकस्येति लक्षणं अंधवत्पश्य रूपाणि शृणु शब्दमकर्णवत् काष्ठवत्पश्यते देहं
प्रशांतस्येति लक्षणं मनः संकल्पकं ध्यात्वा संक्षिप्यात्मनि बुद्धिमान् धारयित्वा तथात्मा
नं धारणा परिकीर्तिता आगमस्याविरोधेन ऊहनं तर्क उच्यते यत्समाप्य च मन्येत स
माधिः परिकीर्तितः ॥ भूमिभागे समे रम्ये सर्वदोषविवर्जिते कृत्वा मनोमयीं रक्षां जप्त्वा
चैवाथ मंडलं पद्मकं स्वस्तिकं वापि भद्रासनमथापि वा बद्ध्वा योगासनं सम्यगुत्तराभिमुखः स्थितः
मत्रोमंत्रनिर्दिष्टत स्थूलातिस्थूलमात्रायां नातिमूर्धमतिक्रमः तिर्यगूर्ध्वमधो दृष्टिं विनिधार्य महामतिः।

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

विं.उ. स्थिरस्थायी विनिःकंपः तदा योगं समभ्यसेत् तालमात्रा तथा योगो धारणा योजनं तथा द्वाद
२. शमात्रो योगस्तु कालतो नियमः स्मृतः अघोषमव्यंजनमस्वरं च अकंठताल्वोष्ठमनासिकं च
अरेफजातमुभयोष्ठवर्जितं यदक्षरं न क्षरते कदाचित् येनासौ पश्यते मार्गं प्राणस्तेन हि ग
2 च्छति अतः समभ्यसेन्नित्यं सन्मार्गगमनाय वै हृद्द्वारं वायुद्वारं च मूर्ध्वद्वारमतः परं मोक्षद्वा
रं बिलं चैव सुषिरं मंडलं विदुः भयं क्रोधमथालस्यमतिस्वप्नातिजागरं अत्याहारमनाहा
रं नित्यं योगी विवर्जयेत् अनेन विधिना सम्यग्नित्यमभ्यस्यतः क्रमात् स्वयमुत्पद्यते ज्ञा
नं त्रिभिर्मासैर्न संशयः चतुर्भिः पश्यते देवान्पंचभिस्तुल्यविक्रमः इच्छयाप्नोति कैवल्यं
षष्ठे मासि न संशयः पार्थिवः पंचमात्राणि चतुर्मात्राणि वारुणः आग्नेयस्तु त्रिमात्राणि।
द्विमात्रो मारुतस्तथा एकमात्रस्तथाकाशो ह्यर्द्धमात्रं च चिंतयेत् सिद्धिं कृत्वा तु मनसा चिं
तयेदात्मनात्मनि त्रिंशत्पर्वांगुलः प्राणो यत्र प्राणः प्रतिष्ठितः एष प्राण इति ख्यातो बा
ह्यप्राणः सगोचरः अशीतिषट्शतं चैव सहस्राणि त्रयोदश लक्षश्चैको निःश्वासो अ
होरात्रप्रमाणतः प्राण आद्यो हृदिस्थाने अपानस्तु पुनर्गुदे समानो नाभिदेशे तु उदानः
कंठमाश्रितः व्यानः सर्वेषु चांगेषु सदा व्याप्य तिष्ठति अथ वर्णास्तु पंचानां प्राणादी
नामनुक्रमात् रक्तवर्णमणिप्रख्यः प्राणो वायुः प्रकीर्तितः अपानमस्य मध्ये तु इंद्रगो
पकसन्निभः समानस्तस्य मध्ये तु गोक्षीरस्फटिकप्रभः अपांडुरनुदानस्तु व्यानो ह्यर्चि
समप्रभः यस्यैष मंडलं भित्वा मारुतो याति मूर्द्धनि यत्र यत्र म्रियेद्वापि न स भूयोऽपि जाय २.
ते न स भूयोऽपि जायते इति ॥ इत्यमृतबिंदूपनिषत्समाप्तः ॥ छ ॥ छ ॥ छ ॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative